श्री रवि सप्तति रहस्यनाम स्तोत्रं

श्री रवि सप्तति रहस्यनाम स्तोत्रं

हंसो भानुः सहस्रांशुस्तपनस्तापनो रविः |
विकर्तनो विवस्वांश्च विश्वकर्मा विभावसुः || 1 ||

विश्वरूपो विश्वकर्ता मार्तंडो मिहिरोऽंशुमान् |
आदित्यश्चोष्णगुः सूर्योऽर्यमा ब्रध्नो दिवाकरः || 2 ||

द्वादशात्मा सप्तहयो भास्करो हस्करः खगः |
सूरः प्रभाकरः श्रीमान् लोकचक्षुर्ग्रहेश्वरः || 3 ||

त्रिलोकेशो लोकसाक्षी तमोऽरिः शाश्वतः शुचिः |
गभस्तिहस्तस्तीव्रांशुस्तरणिः सुमहोरणिः || 4 ||

द्युमणिर्हरिदश्वोऽर्को भानुमान् भयनाशनः |
छंदोश्वो वेदवेद्यश्च भास्वान् पूषा वृषाकपिः || 5 ||

एकचक्ररथो मित्रो मंदेहारिस्तमिस्रहा |
दैत्यहा पापहर्ता च धर्मो धर्मप्रकाशकः || 6 ||

हेलिकश्चित्रभानुश्च कलिघ्नस्ताक्ष्यवाहनः | [दोषघ्नः]
दिक्पतिः पद्मनीनाथः कुशेशयकरो हरिः || 7 ||

घर्मरश्मिर्दुर्निरीक्ष्यश्चंडांशुः कश्यपात्मजः |
एभिः सप्ततिसंख्याकैः पुण्यैः सूर्यस्य नामभिः || 8 ||

इति स्कंदपुराणे काशीखंडे नवमोऽध्याये श्री सूर्य सप्ततिनाम स्तोत्रं |